# Shrikrishna Manasika Puja

# શ્રીકૃષ્ણ માનસિક પૂજા

## Document Information

Text title : shrIkRRiShNamAnasikapUjA

File name : shrIkRRiShNamAnasikapUjA.itx

Category : vishhnu, krishna, pUjA

Location : doc_vishhnu

Author : gAyatrisvarUpa brahmachari

Proofread by : Vani V

Description/comments : shrI bhagavat shrIkRRiShNamAnasikapUjA uttarArdhaH. Author/publisher comment mentions the cost of the book as bhagavadbhakti

Latest update : March 13, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 13, 2022

*sanskritdocuments.org*

# શ્રીકૃષ્ણ માનસિક પૂજા

શ્રી ગણેશાય નમઃ ।

ધ્યાનમ્-

વન્દે શ્રીકૃષ્ણચન્દ્રં છવિયુગલયુતં રાધિકાનાથમેકં
વન્દે વેદાન્તસારં પરમપદમજં દિવ્યકૈવલ્યધામમ્ ।
વન્દે શુદ્ધાત્મરૂપં ગુણરહિતનિજં જ્ઞાનિનાં જ્ઞાનગમ્યં
વન્દે દેવાધિદેવં સકલગુણનિધિં કૃષ્ણ ત્રૈલોક્યનાથમ્ ॥ ૧॥

આવાહનમ્-

સચ્ચિત્સ્વરૂપાત્મકવાસુદેવં
કૈવલ્યધામં પરમં પવિત્રમ્ ।
એકાક્ષરં નિર્મલતત્ત્વમાત્રં
આવાહયામ્યાત્મસ્વરૂપમેકમ્ ॥ ૨॥

આસનમ્-

રમ્યે સદા સ્વચ્છસુવર્ણનિર્મિતે
દેદીપ્યમાને મનસોઽભિરઞ્જને ।
રત્નાસને તિષ્ઠતુ વાસુદેવ
ગોવિન્દ ! યોગેશ્વર ! ગોકુલેશ ! ॥ ૩॥

પાદ્યમ્-

શ્રીવિષ્ણુપાદાર્ચનયોગ્યમુત્તમં
દેવાદિવન્દ્યં પરમં પવિત્રમ્ ।
ગઙ્ગાજલં શુદ્ધમિદં હિ નિર્મિતં
પાદ્યઞ્ચ કૃષ્ણાય સમર્પયામિ ॥ ૪॥

અર્ઘ્યમ્-

ગન્ધાક્ષતૈશ્ચૈવ સુગન્ધિપુષ્પૈઃ
ગઙ્ગાજલૈર્નિર્મિતશુદ્ધમર્ઘ્યમ્ ।

ત્રૈલોક્યનાથાય પરાત્પરાય
તુભ્યં ચ કૃષ્ણાય સમર્પયામિ ॥ ૫॥

આચમનીયમ્-

સમ્પૂર્ણ તીર્થામ્બ્વમલં શિવં જલં
સુગન્ધસમ્પન્નમિદં મનોહરમ્ ।
આચમ્યતામાચમનીયમેતદ્
હે કૃષ્ણ ! સર્વાત્મક ! વાસુદેવ ! ॥ ૬॥

સ્નાનીયમ્-

મન્દાકિની દિવ્યસરસ્વતી તથા
ગઙ્ગા ચ રેવા યમુના ચ નર્મદા ।
નારાયણીત્યાદિ નદી જલૈર્હરે
સ્નાનીયમેતદ્ધિ સમર્પયામિ ॥ ૭॥

પઞ્ચામૃતસ્નાનમ્-

ચિત્તેન સઙ્કલ્પિતશુદ્ધગોઘૃતં
દુગ્ધં દધીક્ષોરસમાક્ષિકાન્વિતમ્ ।
સૌગન્ધિકૈર્દ્રવ્યગણૈશ્ચ સંયુતં
પઞ્ચામૃતં કૃષ્ણ ! સમર્પયામિ ॥ ૮॥

શુદ્ધોદકસ્નાનમ્-

હે કૃષ્ણ ! સર્વોત્તમ ! દિવ્યરૂપ !
હે દેવકીનન્દન ! રુક્મિણીશ ! ।
હે દ્વારકાનાથ ! જગત્પતે ! પ્રભો !
સ્નાનં ચ શુદ્ધોદકમર્પયામિ ॥ ૯॥

ઉદ્વર્તનસ્નાનમ્-

મેરુસમુદ્ભૂતસુગન્ધિચન્દનં
સુશીતલં પુષ્ટિકરં સદૈવ ।
દ્રવ્યં સુગન્ધિં પરમોત્તમોત્તમ-
મુદ્વર્તનં દેવ ! સમર્પયામિ ॥ ૧૦॥

વસ્ત્રમ્-

પીતામ્બરં રમ્યમલૌકિકં તથા
શોભાઢ્ય વિદ્યુત્સમવસ્ત્રમુત્તમમ્ ।

તુભ્યં મયા કૃષ્ણ સમર્પ્યતે પ્રભો !
હે કૃષ્ણ ! હે વ્યાપક ! હે રમેશ ! ॥ ૧૧॥

યજ્ઞોપવીતમ્-
રમ્યં પવિત્રં નવતન્તુ નિર્મિતં
વર્ણેન પીતં નવદેવતામયમ્ ।
ગ્રન્થિત્રયં તત્ ત્રિગુણાત્મકં શુભં
યજ્ઞોપવીતં ચ સમર્પયામિ ॥ ૧૨॥

ચન્દનમ્-
દેવાર્ચનાયાખિલશાસ્ત્રવર્ણિતં
શ્રીખણ્ડનામાખ્યમતીવનિર્મલમ્ ।
અત્યુત્તમં સૌખ્યકરં સુચન્દનં
તુભ્યં મયાકૃષ્ણ ! સમર્પ્યતે પ્રભો ! ॥ ૧૩॥

પુષ્પાદીનિ-
રમ્યાણિ નાનાવિધ વૃક્ષજાનિ
શ્વેતાનિ પુષ્પાણિ સુગન્ધિતાનિ ।
દિવ્યાનિ કૃષ્ણાતુલસીદલાનિ
માલ્યાનિ ચૈવાદ્ય સમર્પયામિ ॥ ૧૪॥

તિલાક્ષતાન્-
હે દેવ હે કૃષ્ણ રમાપતે વિભો
હે ગોપિકાનાથ જનાર્દન પ્રભો ।
હે શ્રીશ હે કેશવ હે જગત્પતે
તિલાક્ષતાન્ કૃષ્ણ સમર્પયામિ ॥ ૧૫॥

ધૂપમ્-
નાનાવિધં તન્નિગમાગમોક્તં
વનસ્પતીનાં રસસમ્ભવં શુભમ્ ।
દિવ્યં પવિત્રાષ્ટસુગન્ધિસંયુતં
ધૂપં ચ કૃષ્ણાય સમર્પયામ્યહમ્ ॥ ૧૬॥

દીપમ્-
વર્ત્તિર્ઘૃતં વહ્નિરિતિ ત્રયાન્વિતં
શુભ્રં સદા સ્વચ્છ પ્રકાશમાનમ્ ।

જ્યોતિર્મયં મઙ્ગલકારકં શુભં
દીપં ચ કૃષ્ણાય સમર્પયામ્યહમ્ ॥ ૧૭॥

નૈવેદ્યમ્-
સ્વાદ્વિષ્ટમત્યુત્તમદિવ્યશર્કરં
મિષ્ટાન્નમત્યન્ત મૃદું પવિત્રકમ્ ।
નૈવેદ્યકં ગોઘૃતપક્વમુત્તમં
તુભ્યં ચ કૃષ્ણાય સમર્પયામ્યહમ્ ॥ ૧૮॥

પાયસમ્-
સુસ્વાદુ ગોદુગ્ધઘૃતાદિ સંયુતં
દેવાર્ચને યોગ્યપવિત્રપાયસમ્ ।
ભક્ત્યા પ્રભો ! નિર્મિતસ્વર્ણપાત્રે
તુભ્યં ચ કૃષ્ણાય સમર્પયામ્યહમ્ ॥ ૧૯॥

શુદ્ધોજલમ્-
આકાશગઙ્ગાજલમુત્તમં શિવં
શ્રી વિષ્ણુનારાયણપૂજનાર્થકમ્ ।
એવં તુલસ્યાદલયુક્તમક્ષયં
તુભ્યં ચ કૃષ્ણાય સમર્પયામ્યહમ્ ॥ ૨૦॥

તામ્બૂલમ્-
પૂગીફલૈલા ખદિરાઢ્યમુત્તમં
ચૂર્ણાદિભિશ્ચૈવયુતં પવિત્રકમ્ ।
દેવાદિ કાર્યાર્થ વિનિર્મિતં પ્રભો !
તામ્બૂલકં કૃષ્ણ ! સમર્પયામ્યહમ્ ॥ ૨૧॥

ફલમ્-
નાનાવિધં કેવલસૂર્યપક્વં
ધાત્રીફલં પેરૂકમામ્રકર્કટીમ્ ।
અક્ષોટકં શ્રીકદલીં ચ દાડિમં
તુમ્યં ચ કૃષ્ણાય સમર્પયામ્યહમ્ ॥ ૨૨॥

રત્નાદિદ્રવ્યમ્-
છત્રં ચ રત્નૈર્જટિતં પ્રકાશકં
આદર્શકં ચામરદિવ્યકુણ્ડલમ્ ।

નાનાવિધાં રત્નસુવર્ણપાદુકાં
તુભ્યં ચ કૃષ્ણાય સમર્પયામ્યહમ્ ॥ ૨૩॥

દક્ષિણામ્-

તેજોમયં શુભ્રસુવર્ણરૂપ્યકં
વજાદિ રત્નૈશ્ચ સહૈવ દક્ષિણામ્ ।
ભક્ત્યા મયા હ્યુત્તમશ્રદ્ધયા કૃતાં
તુભ્યં ચ કૃષ્ણાય સમર્પયામ્યહમ્ ॥ ૨૪॥

આરાર્તિકમ્-

આરાર્તિકં તં કદલીસમુદ્ભવં
કર્પૂરનામાખ્યમતીવ મઙ્ગલમ્ ।
જ્યોતિર્મયં સૂર્યસમાનકાન્તિદં
તુભ્યં ચ કૃષ્ણાય સમર્પયામ્યહમ્ ॥ ૨૫॥

પ્રદક્ષિણાં -

સર્વાણિ પાપાનિ ચ યાનિ તાનિ
નશ્યન્તિ નામ્ના તવ હે મુરારે ।
નામ્નાચતે દેવ પ્રદક્ષિણા કૃતા
તુભ્યં ચ કૃષ્ણાય સમર્પયામ્યહમ્ ॥ ૨૬॥

પુષ્પાઞ્જલીમ્-

પુષ્પાણિ હે દેવ ! સુગન્ધિતાનિ
દેશે ચ કાલે સમયોદ્ભવાનિ ।
બધ્વાઞ્જલિર્નમ્રતયા સુભક્ત્યા
તુભ્યં ચ કૃષ્ણાય સમર્પયામ્યહમ્ ॥ ૨૭॥

ક્ષમાપનમ્-

પ્રભો ! હરે ! દેવ ! જપં ન પૂજાં
જ્ઞાનં ન જાનામિ ન પાઠ મન્ત્રમ્ ।
તથાપિ હે દેવ ! ક્ષમાપનઙ્કૃતં
તુભ્યં ચ કૃષ્ણાય સમર્પયામ્યહમ્ ॥ ૨૮॥

પ્રાર્થના-

હે દેવકીનન્દન ! કૃષ્ણચન્દ્ર !
હે દેવ ! સર્વાત્મક ! વાસુદેવ ! ।

હે કૃષ્ણ ! વિષ્ણોઽવ્યય ! વ્યાપક ! પ્રભો !
નિત્યં પ્રસન્નોભવ હે મુરારે ! ॥ ૨૯॥

રમ્યં તુલસ્યા વનમાલયા યુતં
વંશ્યા ચ ચક્રેણ સપીતવસ્ત્રમ્ ।
પદ્માક્ષનીલામ્બુજશ્યામલાઙ્ગં
ત્વાં દ્રષ્ટુમિચ્છામિ સદૈવ વિષ્ણો ! ॥ ૩૦॥

પાઠફલપ્રાપ્તિ-

ઇત્થં પવિત્રં પરમામૃતં હરિં
અલૌકિકં કેવલદિવ્યમૂર્તિમ્ ।
અનન્તપારામૃતમવ્યયં પ્રભું
નારાયણં કેવલ કૃષ્ણપૂજનમ્ ॥ ૩૧॥

ઉત્થાય ચ બ્રાહ્મમુહુર્ત મધ્યે
ધ્યાત્વા પરંબ્રહ્મ હરિં સદૈવ ।
કૃત્વા શુભં માનસપૂજનં હરેઃ
સર્વં ફલં પ્રાપ્સ્યતિ કૃષ્ણ ભક્તઃ ॥ ૩૨॥

ઇતિ શ્રી ગાયત્રીસ્વરૂપ બ્રહ્મચારિણા વિરચિતં માનસિક-
કૃષ્ણપૂજનં સમ્પૂર્ણમ્ ॥

Proofread by Vani V

*Shrikrishna Manasika Puja*

pdf was typeset on March 13, 2022

Please send corrections to *sanskrit@cheerful.com*